ज्वलनाद्धूमोद्गतिभिर्विविधाकृतिरम्बरे यथा भाति ।
तद्वद्विष्णोः सृष्टिः स्वमायया द्वैतविस्तरो भाति ॥
भ्रान्त इव मनसि भ्रान्ते हृष्टे हृष्ट इव मूढ इव मूढे ।
व्यवहारस्थो न पुनः परमार्थेन ईश्वरो भवति ॥
जलधरधूमोद्गतिभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत् प्रकृतिविकारैरपरामृष्टः परः पुरुषः ॥
एकस्मिन्नपि च घटे धूमादिमलावृते घटाः शेषाः ।
न भवन्ति मलोपेता यद्वज्जीवोऽपि तद्वदिह ॥
देहेन्द्रियेषु नियताः कर्म्मगुणाः कुर्व्वते स्वभोगार्थम् ।
नाहं कर्त्ता न ममेति ज्ञानतः कर्म्म नैव बध्नाति ॥
अन्यशरीरेण कृतं कर्म्म भवे येन देह उत्पन्नः ।
तदवश्यं भोक्तव्यं भोगादेव क्षयोऽस्य निर्द्दिष्टः ॥
प्राक् ज्ञानोत्पत्तिचितं यत् कर्म्म ज्ञानशिखिशिखालीढम् ।
बीजमिव दहनदग्धं जन्मसमर्थं न तद्भवति ॥
ज्ञानोत्पत्तेरूर्द्ध्वं क्रियमाणं कर्म्म यत्तदपि ।
न श्लिष्यति कर्त्तारं पुष्करपर्णं यथा वारि ॥
वाग्देहमानसैरिह कर्म्मचयः क्रियत इति बुधाः प्राहुः ।
एकोऽपि नाहमेषां कर्त्ता तत्कर्म्मणामस्मि ॥
कर्म्मफलबीजनाशाज्जन्मविनाशो न चात्र सन्देहः ।
बुद्धैवमपगततमाः सवितेव विभाति भारूपः ॥
यद्वदिषीकातूलं पवनोद्धूतं दश दिशो याति ।
नश्यन्ति तत्त्वज्ञानात्तथैव कर्म्माणि तत्त्वविदः ।
क्षीरादुद्धृतमाज्यं क्षिप्तं यद्वन्न पूर्व्ववत्तस्मिन् ।
प्रकृतिगुणेभ्यस्तद्वत् पृथक्कृतश्चेतनोऽप्यात्मा ॥
गुणमयमायागहनं निर्हूय यथा तमः सहस्रांशुः ।
बाह्याभ्यन्तरचारी सैन्धवघनवत् भवेत् पुरुषः ॥
यद्वद्देहोऽवयवा मृदेव तस्या विकारजातानि ।
तद्वत् स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥
एकस्मात् चेतनाद्भवः चेतनजातयो जाताः ।
लौहगतादिव दहनाः समन्ततो विस्फुलिङ्गकणाः ॥
ते गुणसङ्गमदोषाद्बद्धा इव धान्यजातयः स्वतुषैः ।
जन्म लभते तावद्यावन्न ज्ञानवह्निना दग्धाः ॥
त्रिगुणा चैतन्यात्मनि सर्व्वगतेऽवस्थिताखिलाधारे ।
कुरुते सृष्टिमविद्या सर्व्वत्र स्पृश्यते तया नात्मा ॥
रज्ज्वां भुजङ्गहेतौ प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशौ न च कारणमस्ति तद्वदिह ॥
जन्मविनाशनगमनागमनमलैः सङ्गवर्जितो नित्यम् ।
आकाश इव घटादिषु सर्व्वात्मा सर्व्वतोपेतः ॥
कर्म्मशुभाशुभजनितैः सुखदुःखैर्बन्धो भवत्युपाधीनाम् ।
तत्संसर्गाद्बद्धस्तस्करसङ्गादतस्करवत् ॥
देहगुणकरणगोचरसङ्गात् पुरुषस्य यावदिह भावाः ।
तावन्मायापाशैः संसारे बद्ध इव भाति ॥
मातृपितृबान्धवधनभोगसंमूढः ।
जन्मजरामरणमये चक्र इव भ्राम्यते जन्तुः ॥
लोकव्यवहारकृतां य इहाविद्यामुपासते मूढाः ।
ते जननमरणधर्म्माणो भ्रान्तमजेत्य खिद्यन्ते ॥
हिमफेनबुद्बुदा इव जलस्य धूमो यथा वह्नेः ।
तद्वत् स्वभावभूता मायैषा कीर्त्तिता विष्णोः ॥
एवं द्वैतविकल्पां भ्रमस्वरूपां विमोहिनीं मायाम् ।
उत्सृज्य सकलं निष्कलमद्वैतं भावयेद्ब्रह्म ॥
यद्वत् सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वद्ब्रह्मणि विमले भावनया तन्मयत्वमुपयाति ॥
इत्थं द्वैतसमूहे भावनया ब्रह्मभूयमुपयाति ।
को मोहः कः शोकः सर्व्वं ब्रह्मावलोकयतः ॥
विगतोपाधिस्फटिकः स्वप्रभया भाति निर्म्मलो यद्वत् ।
चिद्दीपः स्वप्रभया तथा विभातीह निरुपाधिः ॥
गुणकरणगणशरीरप्राणैस्तनुमात्रजातिसुखदुःखैः ।
अपरामृष्टो व्यापी चिद्रूपोऽयं सदा विमलः ॥
द्रष्टा श्रोता घ्राता स्पर्शयिता रसयिता ग्रहीता च ।
देही देहेन्द्रियधीविवर्जितः स्यान्न कर्त्तासौ ॥
एको नैकत्रावस्थितो महैश्वर्य्यं योगतो व्याप्तः ।
आकाशवदखिलमिदं न कश्चिदप्यत्र सन्देहः ॥
आत्मैवेदं सर्व्वं निष्कलसकलं यदैव भावयति ।
मोहगहनाद्विमुक्तस्तदैव परमेश्वरीभूतः ॥
यद्यत् सिद्धान्तागमतर्केषु भ्रमन्ति रागान्धाः ।
अनुमोदामस्तत्तेषां सर्व्वात्मवादिधियाम् ॥
सर्व्वाकारो भगवानुपास्यते येन येन भावेन ।
तं तं भावं भूत्वा चिन्तामणिवत् समभ्येति ॥
नारायणमात्मानं ज्ञात्वा सर्गस्थितिप्रलयहेतुम् ।
सर्व्वज्ञः सर्व्वगतः सर्व्वः सर्व्वेश्वरो भवति ॥
आत्मज्ञस्तरति शुचं यस्माद्विद्वान्न बिभेति कुतश्चित् ।
मृत्योरपि मरणभयं न भवत्यन्यद्भयं कुतस्तस्य ॥
च्छेदद्विविध्यघातकबन्धनमोक्षैर्व्विवर्ज्जितं नित्यम् ।
परमार्थतत्त्वमेतत् यदतोऽन्यत्तदनृतं सर्व्वम् ॥
एवं प्रकृतिपुरुषं विज्ञाय निरस्तकल्पनाजालः ।
आत्मारामः प्रशमं समास्थितः केवलीभवति ॥
नलकदलिवेणुबाणा नश्यन्ति यथा स्वपुष्पमासाद्य ।
तद्वत्स्वभावभूताः स्वभावतां प्राप्य नश्यन्ति ॥
भिन्ने ज्ञानग्रन्थौ छिन्ने संशयगणे शुभाशुभे क्षीणे ।
दग्धे च जन्मबीजे परमानन्दं हरिं याति ॥
मोक्षस्य नैव किञ्चिद्धामास्ति न चापि गमनमन्यत्र ।
अज्ञानमयग्रन्थेर्भेदो यस्तं विदुर्मोक्षम् ॥
बुद्ध्वैवमसत्यमिदं विष्णोर्मायात्मकं जगद्रूपम् ।
विगतद्वन्द्वोपाधिकभोगासङ्गो भवेच्छान्तः ॥
बुद्ध्वा विभक्तां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
निर्मुक्तः सर्व्वकर्म्मभिरम्बुजपत्रं यथा सलिलैः ॥
अश्नन् यद्वा तद्वा संवीतो येन केनचिच्छान्तः ।
यत्र क्वचन च शायी विमुच्यते सर्व्वभूतात्मा ॥
हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥
मदकोपहर्षमत्सरविषादभयपरुषवर्ज्यवाग्बुद्धिः ।
निस्तोत्रवषट्कारो जड़वद्विचरेदगाधमतिः ॥
उत्पत्तिनाशवर्ज्जितमेवं परमार्थमुपलभ्य ।
कृतकृत्यः सफलजनुः सर्व्वगतस्तिष्ठति यथेष्टम् ॥
व्यापिनमभिन्नमित्थं सर्व्वात्मानं विधूतनानात्वम् ।
निरुपमपरमानन्दं यो वेद स तन्मयो भवति ॥
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् ।
ज्ञानसमकालं मुक्तः कैवल्यं याति हतशोकः ॥
पुण्याय तीर्थसेवा निरयाय श्वपचसदननिधनगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किन्तेन ॥
वृषाग्राक्षुतपादो यद्वदनिच्छन्नरः क्षितौ पतति ।
तद्वद्गुणपुरुषज्ञोऽनिच्छन्नपि केवलीभवति ॥
परमार्थमार्गसाधनमारभ्याप्राप्य योगमपि नाम ।
सुरलोकभोगभोगी मुदितमना मोदते सुभ्रम् ॥
विषयेषु सार्व्वभौमः सर्व्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्व्वदेवैर्योगभ्रष्टस्तथा पूज्यः ।
महता कालेन महान् मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं यत्तत् परमं पदं विष्णोः ॥
वेदान्तशास्त्रमखिलं विलोक्य शेषोऽखिलाधारः ।
आर्य्यापञ्चाशीत्या बबन्ध परमार्थसारमिदम् ॥”
इति श्रीशेषनागविरचितं परमार्थसारं समाप्तम् ॥

वेदान्ती, [न्] पुं, (वेदान्तोऽस्यास्तीति । वेदान्त + इनिः ।) वेदान्तशास्त्रवेत्ता । तत्पर्य्यायः । ब्रह्मवादी २ । इति जटाधरः ॥

वेदारः, पुं, कृकलासः । इति त्रिकाण्डशेषः ॥